## 2.5.3 - आईटी एकीकरण और परीक्षा प्रक्रियाओं और प्रक्रियाओं में सुधार (निरंतर आंतरिक मूल्यांकन और अंतिम सेमेस्टर मूल्यांकन) ने संस्थान की परीक्षा प्रबंधन प्रणाली में काफी सुधार लाया है।

**IT integration and reforms in the examination procedures and processes (continuous internal assessment and end-semester assessment) have brought in considerable improvement in examination management system of the institution**

---

पाठ्यक्रमाणाम् अंग भवति परीक्षापद्धतिः। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य परीक्षापद्धतिः, तन्त्रज्ञानसम्पत्ते सहकारेण सूचनाप्रविधिसंयोजनेन परीक्षासम्बन्धिकार्याणि निर्वहति। परीक्षापद्धतिः, आन्तरिकपरीक्षाप्रणाली, आन्तरिकमूल्यांकन च यथाकालं समन्वयति। विश्वविद्यालयद्वारा शास्त्रिपाठ्यक्रमः, आचार्यपाठ्यक्रमः, शिक्षाशास्त्रिपाठ्यक्रमः, विद्यावारिधिपाठ्यक्रमः, पदविकापाठ्यक्रमः, प्रमाणपत्रीयपाठ्यक्रमश्च संचाल्यते। तत्र शिक्षाशास्त्रिपाठ्यक्रमः वार्षिकपद्धत्या, शास्त्रि-आचार्यपाठ्यक्रमौ सत्रार्धपद्धत्या च प्रवर्तते। शास्त्री, शिक्षाशास्त्री, आचार्यः इत्यादीनां पाठ्यक्रमाणां प्रक्रिया प्रवेशपरीक्षया आरभ्यते। सर्वाः प्रक्रिया तदर्थं मासद्वयात् पूर्वं सूचनाप्रसारादयः सर्वाः सिद्धताः विश्वविद्यालयस्य परीक्षाविभागेन निरूह्यन्ते। परीक्षाविभागः प्रश्नपत्रनिर्माणाय विषयज्ञान् अनुभविनः अध्यापकान् सूचयति। प्रश्नपत्रनिर्माणाय विंशदिनात्मकः कालः निर्दिश्यते। समानविषये त्रीणि प्रश्नपत्राणि निर्मातुं ते अध्यापकाः निर्दिष्टाः भवन्ति।

परीक्षार्थिनः छात्राः परीक्षाप्रपत्रं पूरयेयुः। निर्दिष्टं email संकेत कूटाक्षरं च आदाय निर्दिष्टजालपुटद्वारा परीक्षाशुल्कं समर्पयेयुः। प्रवेशपत्रं जालपुटे आरोपितं परीक्षार्थिनः स्वयम् अवरोपणं कर्तुं शक्नुवन्ति। परीक्षार्थी परीक्षाकेन्द्रं प्रेवेशपत्रेण सह प्रविशेत् इति नियमः अनुस्त्रियते।

प्रश्नपत्राणाम् उत्तरपुस्तिकायाः च मुद्रणं विधाय परीक्षाकेन्द्रं प्रति प्रेष्यते। विभिन्नराज्येषु स्थिताः विश्वविद्यालयस्य सम्बद्धमहाविद्यालयाः परीक्षाकेन्द्राणि भवन्ति। परीक्षायाः सुष्ठुसम्पादनाय सर्वेषु परीक्षाकेन्द्रेषु मुख्यपरीक्षकः नियुक्तो भवति।

1. परीक्षाप्रक्रिया–

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयद्वारा शास्त्रि, शिक्षाशास्त्रि विद्यावारिधि–पाठ्यक्रमेषु प्रवेशेच्छुकछात्राणां कृते प्रवेशपरीक्षाः आयोज्यन्ते। आसु परीक्षासु शिक्षाशास्त्रि, विद्यावारिधिपाठ्यक्रमेषु च प्रवेशेच्छुकछात्राणां कृते अखिलभारतीयस्तरे प्रवेशपरीक्षाः आयोज्यन्ते। सर्वासामपि परीक्षाणां कृते प्रवेशेच्छुकाभ्यार्थिभिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य जालपुटमाध्यमेन सद्यस्कावेदनं (Online Applicaion) क्रियते। तदनु शास्त्रिपाठ्यक्रमस्य कृते विश्वविद्यालयस्य सर्वेषु महाविद्यालयेषु निर्धारिततिथौ परीक्षा आयोज्यते। एतदर्थं विस्तृताः सूचनाः विश्वविद्यालयस्य परिसराणाञ्च जालपटेषु प्रसिद्धवार्तापत्रिकासु च विज्ञापिताः भवन्ति।

त्रिवर्षीयशास्त्रि–द्विवर्षीय– आचार्यमधीयानानां छात्राणां प्रतिवर्षं द्विः सत्रार्धपरीक्षा (Semester Exam) आयोज्यन्ते। एवं शास्त्रिपाठ्यक्रमस्य आहत्य षट् सत्रार्धपरीक्षाः आचार्यपाठ्यक्रमस्य चतस्त्रः सत्रार्धपरीक्षाः आयोज्यन्ते। आसु सत्रार्धपरीक्षासु प्रथम–तृतीय–पंचमसत्रार्धपरीक्षाः नवम्बर–दिसम्बरमासयोः द्वितीय–चतुर्थ–षष्ठसत्रार्धपरीक्षाः मई–जूनमासयो आयोज्यन्ते।

द्विवर्षीयशिक्षाशास्त्रिपाठ्यक्रमस्य प्रतिवर्षं वार्षिकी परीक्षा आयोज्यते। वार्षिकी परीक्षा प्रायेण अप्रिल–मई– मासयोः आयोज्यते। विद्यावारिधिपाठ्यक्रममधीयानानां शोधच्छात्राणां कृते षाण्मासिकपाठ्यक्रमस्य अन्ते लिखितपरीक्षा आयोज्यते अपि च शोधकार्यस्य अन्ते शोधप्रबन्धसमर्पणात् परं मौखिकी परीक्षा आयोज्यते।

1– सूचनाप्रविधेः साहायम्

सूचनाप्रविधिः–

विभिन्नानां कार्याणां सम्पादने सौकर्यं कल्पयति अतः सम्प्रति सूचनाप्रतिवधेः प्रभावः सर्वेषु क्षेत्रेषु वर्तते। शिक्षाजगत्यपि नवनवीनानां प्रयोगाणां परिणामतो प्रविधयः प्रयुज्यमाना वर्तन्ते। अधुना शिक्षणेप्रशिक्षणे अध्ययने मूल्याकंने विभिन्नेतरगतिविधीनां सम्पादने च सूचनाप्रविधिः अत्यन्तं सहायको भवति। परीक्षाप्रबन्धनप्रणाल्याः संचालनेऽपि सूचनाप्रविधिः अत्यन्तमुपकारी वर्तते। पूर्वं सूचनाप्रविधेरभावे परीक्षानिमित्तमावेदनपूरणे एव महान् कालः समयश्च भवति स्म तदधुना सूचनाप्रविधः कारणात् भृशं रक्ष्यते। सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयद्वारा आयोज्यमानानां विभिन्नानां परीक्षाणामावेदनपत्राणि तदर्थं समर्प्यमाणं शुल्कञ्च सर्वमपि सद्यस्कमाध्यमेन (Online) क्रियमाणं वर्तते। अपि च सर्वाः अपि सूचनाः जालपुटमाध्यमेनैव

प्रदीयमानाः सन्ति। भाविनि काले अस्य प्रविधेः विभिन्नेषु कार्येषु इतोऽपि अनुप्रयोगाय सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः प्रयतमानो वर्तते।

1. संगणकपटलोपरि पत्रमौल्यमापनव्यवस्था

   संगणक–सहायकानुदेशनैः सह मूल्यांकनकार्येष्वपि विश्वविद्यालयस्य परीक्षाविभागेन यथासमयं निर्देशाः दीयन्ते। विगतकोविड 19–महामार्याः प्रकोपविशिष्टपरिस्थितिषु परीक्षाविभागेन उत्तरपुस्तिकाभिः सम्बद्धमूल्यांकनायापि स्पष्टनिर्देशाः प्रदत्ताः। निर्देशेषु ऑनलाइनमाध्यमेन उत्तरपुस्तिकानां संगणकपटलोपरि–मूल्यांकनमेव कर्तव्यमिति विशिष्टमेव। एतदर्थम् उत्तरपुस्तिकानां भौतिकस्वरूपम् अंगीकृत्य वितरणं मूल्यांकनञ्च अनिर्दिष्टं निषिद्धच। अनया प्रक्रियया अनावश्यककर्गज–वित्तादिव्ययोऽपि नाभवत्, तथैव अध्यापकानां परीक्षणकाणां च सहयोगोऽपि प्राप्तः। एतैः क्रियाकलापैः परीक्षाप्रबन्धनसमितेः वर्धने आनुकूल्यं समानीतं वर्तते।